# काव्यप्रकाशः

- प्रस्तुतकर्त्री
- डॉ.पूजा मनमोहनोपाध्याया
- सहायिकाचार्या
- विशिष्टसंस्कृतविभागः
- महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

# काव्यप्रकाशः

## प्रथम उल्लासः

मंगलाचरणम् –

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरूचिरां निर्मितिमादधती भारती कवेर्जयति ।।

| कवेः सृष्टिः | ब्रह्मणः सृष्टिः |
|---|---|
| 1 नियत्याः नियमेभ्यः रहिता | 1 नियतिशक्त्या नियतरूपा |
| 2 ह्लादैकमयी | 2 त्रिगुणात्मिका (सुखदुःखमोहस्वभावा) |
| 3 अनन्यपरतन्त्रा–केवलं कवेः अधीना | 3 विविधसहकारिकारणपरतन्त्रा |
| 4 नवरसरूचिरा | 4 षड्रसा |

# काव्यप्रयोजनम्

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।

- यशसे – कालिदासादीनामिव
- अर्थकृते – श्रीहर्षादेः धावकादीनामिव
- व्यवहारविदे – राजादिगतोचिताचारपरिज्ञानम्
- शिवेतरक्षतये – आदित्यादेः मयूरादीनामिव अनर्थनिवारणम्
- सद्यः परनिर्वृतये – सकल प्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्
- कान्तासम्मिततयोपदेशयुजे – शब्दार्थप्राधान्यात् विलक्षणम् (रसप्रधानम्)

# उपदेशस्य शैलीत्रयम्

| प्रभुसम्मितः (शब्दप्राधान्यम्) | सुहृत्सम्मितः (अर्थप्राधान्यम्) | कान्तासम्मितः (रसप्राधान्यम्) |
| --- | --- | --- |
| वेदादिशास्त्राणि | पुराणेतिहासादि | काव्यम् |

# प्रयोजन–विभागः

कविनिष्ठप्रयोजनानि

1 यशसे

2 अर्थकृते

3 शिवेतरक्षतये

पाठकनिष्ठप्रयोजनानि

1 व्यवहारविदे

2 सद्यः परनिर्वृतये

3 कान्तासम्मिततयोपदेशयुजे

# काव्यहेतुः

शक्तिर्निपुणता लोकशास्त्र – काव्याद्यवेक्षणात् ।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।

- शक्तिः – कवित्वबीजरूपः संस्कारविशेषः ।
- निपुणता – लोकव्यवहारस्य शास्त्राणां काव्यानांच पर्यालोचनेन उत्पन्नं नैपुण्यम् ।
- अभ्यासः – काव्यज्ञानाम् उपदेशेन करणे योजने च पौनः पुन्येन प्रवृतिः ।